QRTSLJ

**अष्टमः पाठः**

# सिकतासेतुः

*प्रस्तुत नाट्यांश सोमदेव द्वारा रचित कथासरित्सागर के सप्तम लम्बक (अध्याय) पर आधारित है। यहाँ तपोबल से विद्या पाने के लिए प्रयत्नशील तपोदत्त नामक एक बालक की कथा का वर्णन है। उसके समुचित मार्गदर्शन के लिए वेष बदलकर इंद्र उसके पास आते हैं और पास ही गंगा में बालू से सेतुनिर्माण के कार्य में लग जाते हैं। उन्हें वैसा करते देख तपोदत्त उनका उपहास करता हुआ कहता है– 'अरे'! किसलिए गंगा के जल में व्यर्थ ही बालू से पुल बनाने का प्रयत्न कर रहे हो ?' इंद्र उन्हें उत्तर देते हैं – यदि पढ़ने, सुनने और अक्षरों की लिपि के अभ्यास के बिना तुम विद्या पा सकते हो तो बालू से पुल बनाना भी संभव है। इंद्र के अभिप्राय को जानकर तपोदत्त तपस्या करना छोड़कर गुरुजनों के मार्गदर्शन में विद्या का ठीक–ठीक अभ्यास करने के लिए गुरुकुल चला जाता है।*

(ततः प्रविशति तपस्यारतः तपोदत्तः)

तपोदत्तः — अहमस्मि तपोदत्तः। बाल्ये पितृचरणैः क्लेश्यमानोऽपि विद्यां नाधीतवानस्मि। तस्मात् सर्वैः कुटुम्बिभिः मित्रैः ज्ञातिजनैश्च गर्हितोऽभवम्। (ऊर्ध्वं निःश्वस्य) हा विधे! किमिदम्मया कृतम् ? कीदृशी दुर्बुद्धिरासीत्तदा! एतदपि न चिन्तितं

यत् —

**परिधानैरलङ्कारैर्भूषितोऽपि न शोभते।**
**नरो निर्मणिभोगीव सभायां यदि वा गृहे।।1।।**

(किञ्चिद् विमृश्य)

भवतु, किमेतेन ? दिवसे मार्गभ्रान्तः सन्ध्यां यावद् यदि गृहमुपैति तदपि वरम्। नाऽसौ भ्रान्तो मन्यते। एष इदानीं तपश्चर्यया विद्यामवाप्तुं प्रवृत्तोऽस्मि।

(जलोच्छलनध्वनिः श्रूयते)

अये कुतोऽयं कल्लोलोच्छलनध्वनिः? महामत्स्यो मकरो वा भवेत्। पश्यामि तावत्।

(पुरुषमेकं सिकताभिः सेतुनिर्माण–प्रयासं कुर्वाणं दृष्ट्वा सहासम्)

हन्त! नास्त्यभावो जगति मूर्खाणाम्! तीव्रप्रवाहायां नद्यां मूढोऽयं सिकताभिः सेतुं निर्मातुं प्रयतते! (साट्टहासं पार्श्वमुपेत्य)

भो महाशय! किमिदं विधीयते! अलमलं तव श्रमेण। पश्य,

**रामो बबन्ध यं सेतुं शिलाभिर्मकरालये।**
**विदधद् बालुकाभिस्तं यासि त्वमतिरामताम् ।।2।।**



चिन्तय तावत्। सिकताभिः क्वचित्सेतुः कर्तुं युज्यते ?

पुरुषः – भोस्तपस्विन्! कथं मामुपरुणत्सि। प्रयत्नेन किं न सिद्धं भवति ? कावश्यकता शिलानाम् ? सिकताभिरेव सेतुं करिष्यामि स्वसंकल्पदृढतया।

तपोदत्तः – आश्यर्चम्! सिकताभिरेव सेतुं करिष्यसि ? सिकता जलप्रवाहे स्थास्यन्ति किम् ? भवता चिन्तितं न वा ?

पुरुषः – (सोत्प्रासम्) चिन्तितं चिन्तितम्। सम्यक् चिन्तितम्। नाहं सोपानमार्गैरट्टमधिरोढुं विश्वसिमि। समुत्प्लुत्यैव गन्तुं क्षमोऽस्मि।

| | | |
|---|---|---|
| तपोदत्तः | – | (सव्यंग्यम्) साधु साधु! आञ्जनेयमप्यतिक्रामसि! |
| पुरुषः | – | (सविमर्शम्) कोऽत्र सन्देहः ? किञ्च,<br>**विना लिप्यक्षरज्ञानं तपोभिरेव केवलम्।**<br>**यदि विद्या वशे स्युस्ते, सेतुरेष तथा मम।।3।।** |
| तपोदत्तः | – | (सवैलक्ष्यम् आत्मगतम्)<br>अये! मामेवोद्दिश्य भद्रपुरुषोऽयम् अधिक्षिपति! नूनं सत्यमत्र पश्यामि। अक्षरज्ञानं विनैव वैदुष्यमवाप्तुम् अभिलषामि! तदियं भगवत्याः शारदाया अवमानना। गुरुगृहं गत्वैव विद्याभ्यासो मया करणीयः। पुरुषार्थैरेव लक्ष्यं प्राप्यते।<br>(प्रकाशम्)<br>भो नरोत्तम! नाऽहं जाने यत् कोऽस्ति भवान्। परन्तु भवद्भिः उन्मीलितं मे नयनयुगलम्। तपोमात्रेण विद्यामवाप्तुं प्रयतमानोऽहमपि सिकताभिरेव सेतुनिर्माणप्रयासं करोमि। तदिदानीं विद्याध्ययनाय गुरुकुलमेव गच्छामि।<br>(सप्रणामं गच्छति) |

## शब्दार्थाः

| | | |
|---|---|---|
| सिकता | – | रेत |
| सेतुः | – | पुल |
| तपस्यारतः | – | तपस्या में लीन |
| पितृचरणैः | – | पिताजी के द्वारा |
| क्लेश्यमानः | – | व्याकुल किया जाता हुआ |
| अधीतवान् | – | पढ़ा |
| कुटुम्बिभिः | – | कुटुम्बियों द्वारा |
| ज्ञातिजनैः | – | बन्धु–बान्धवों द्वारा |

| | | |
|---|---|---|
| गर्हितः | – | अपमानित |
| निःश्वस्य | – | लम्बी साँस लेकर |
| दुर्बुद्धिः | – | दुष्ट बुद्धिवाला |
| परिधानैः | – | कपड़ों से, पहनावों से |
| मार्गभ्रान्तः | – | राह से भटका हुआ |
| उपैति | – | जाता है, समीप जाता है |
| तपश्चर्यया | – | तपस्या के द्वारा |
| जलोच्छलनध्वनिः | – | पानी के उछलने की आवाज |
| कल्लोलोच्छलनध्वनिः | – | तरंगों के उछलने की ध्वनि |
| कुर्वाणम् | – | करते हुए |
| सहासम् | – | हँसते हुए |
| सोत्प्रासम् | – | खिल्ली उड़ाते हुए, चुटकी लेते हुए |
| साट्टहासम् | – | जोर से हँसकर |
| अट्टम् | – | अटारी को |
| अधिरोढुम् | – | चढ़ने के लिए |
| उपरुणत्सि | – | रोकते हो |
| आञ्जनेयम् | – | अञ्जनिपुत्र हनुमान् को |
| सविमर्शम् | – | सोच विचार कर |
| सवैलक्ष्यम् | – | लज्जापूर्वक |
| वैदुष्यम् | – | विद्वत्ता |
| उन्मीलितम् | – | खोल दी |

# अभ्यासः

**1. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत –**

(क) अनधीतः तपोदत्तः कैः गर्हितोऽभवत् ?

(ख) तपोदत्तः केन प्रकारेण विद्यामवाप्तुं प्रवृत्तोऽभवत् ?

(ग) तपोदत्तः पुरुषस्य कां चेष्टां दृष्ट्वा अहसत् ?

(घ) तपोमात्रेण विद्यां प्राप्तुं तस्य प्रयासः कीदृशः कथितः ?

(ङ.) अन्ते तपोदत्तः विद्याग्रहणाय कुत्र गतः ?

**2. भिन्नवर्गीयं पदं चिनुत –**

| | | |
|---|---|---|
| **यथा** – अधिरोढुम्, गन्तुम्, सेतुम्, निर्मातुम् | = | सेतुम् |
| (क) निःश्वस्य, चिन्तय, विमृश्य, उपेत्य | = | ..................... |
| (ख) विश्वसिमि, पश्यामि, करिष्यामि, अभिलषामि | = | ..................... |
| (ग) तपोभिः, दुर्बुद्धिः, सिकताभिः, कुटुम्बिभिः | = | ..................... |

**3. (क) अधोलिखितानि कथनानि कः कं प्रति कथयति ?**

| **कथनानि** | | **कः** | **कम्** |
|---|---|---|---|
| (1) हा विधे! किमिदं मया कृतम् ? | – | ..................... | ............... |
| (2) भो महाशय! किमिदं विधीयते ? | – | ..................... | ............... |
| (3) भोस्तपस्विन्! कथं माम् उपरुणत्सि ? | – | ..................... | ............... |
| (4) सिकताः जलप्रवाहे स्थास्यन्ति किम् ? | – | ..................... | ............... |
| (5) नाहं जाने कोऽस्ति भवान् ? | – | ..................... | ............... |

**(ख) रेखांकितानि सर्वनामपदानि कस्मै प्रयुक्तानि ?**

(1) अलमलं <u>तव</u> श्रमेण।

(2) न <u>अहं</u> सोपानमार्गैरट्टमधिरोढुं विश्वसिमि।

(3) चिन्तितं भवता न वा।

(4) गुरुगृहं गत्वैव विद्याभ्यासो मया करणीयः।

(5) भवद्भिः उन्मीलितं मे नयनयुगलम्।

**4. रेखाङ्कितपदान्यधिकृत्य प्रश्ननिर्माणं कुरुत –**

(क) तपोदत्तः तपश्चर्यया विद्यामवाप्तुं प्रवृत्तोऽस्ति।

(ख) तपोदत्तः कुटुम्बिभिः मित्रैः गर्हितः अभवत्।

(ग) पुरुषः नद्यां सिकताभिः सेतुं निर्मातुं प्रयतते।

(घ) तपोदत्तः अक्षरज्ञानं विनैव वैदुष्यमवाप्तुम् अभिलषति।

(ङ.) तपोदत्तः विद्याध्ययनाय गुरुकुलम् अगच्छत्।

(च) गुरुगृहं गत्वैव विद्याभ्यासः करणीयः।

**5. उदाहरणमनुसृत्य अधोलिखितविग्रहपदानां समस्तपदानि लिखत –**

| **विग्रहपदानि** | **समस्तपदानि** |
|---|---|
| **यथा** – संकल्पस्य सातत्येन | संकल्पसातत्येन |
| (क) अक्षराणां ज्ञानम् | ................................................ |
| (ख) सिकतायाः सेतुः | ................................................ |
| (ग) पितुः चरणैः | ................................................ |
| (घ) गुरोः गृहम् | ................................................ |
| (ङ) विद्यायाः अभ्यासः | ................................................ |

**6. उदाहरणमनुसृत्य अधोलिखितानां समस्तपदानां विग्रहं कुरुत–**

| **समस्तपदानि** | **विग्रहपदानि** |
|---|---|
| **यथा** – नयनयुगलम् | नयनयोः युगलम् |
| (क) जलप्रवाहे | ................................................ |
| (ख) तपश्चर्या | ................................................ |

(ग) जलोच्छलनध्वनिः ..........................................................

(ङ) सेतुनिर्माणप्रयासः ..........................................................

**7. उदाहरणमनुसृत्य कोष्ठकात् पदम् आदाय नूतनवाक्यद्वयं रचयत –**

(क) **यथा** – अलं चिन्तया ('अलम्' योगे तृतीया)

(1) .................. .................. (भय)

(2) .................. .................. (कोलाहल)

(ख) **यथा** – माम् अनु सः गच्छति।

(1) ............. ............. ............. ............. (गृह)

(2) ............. ............. ............. ............. (पर्वत)

QS3NN7